No. ४६१६

Title आतुरसंन्यासविधिः आङ्गिरसोक्तः

Author ×

Extent ४ पत्राणि Age ×

Subject धर्मशास्त्र

आतुरसंन्यासविधिः

प७१६

आतुर संन्यासविधिः

आतुरसन्यास पद्धत

६०

आ॰ स॰ श्रीगणेशायनमः अथातुरसन्यासोनिरूप्यते सन्यासेसर्वत्रस्वशरीरव्यतिरिक्तं
सर्वंत्यजन्संन्यासाश्रमंगमिष्यामीतिसंकल्प्यप्रैषोच्चारणाभयप्रदानानितित्रितं
१ यंप्रधानं अन्योनांदीमुखादिग्रहाणांतःकर्मकालयोग्यस्यैवांगं अतएवातुर
सन्यासेसंकल्पप्रैषोक्त्याभयप्रदानात्फलंश्रूयते यद्यातुरःस्यान्मनसावावाचा
वासन्यसेदेषपंथाब्रह्मणाह्यनुषितः तेनेतिसन्यासिब्रह्मविदेमेवेतिभगव
न्नितिति आतुराणांतुसन्यासेनविधिर्नैवचक्रिया प्रैषमात्रंसमुच्चार्यसं
न्यासंतत्रपूरयेदिति प्रैषमात्रंकर्मत्रितयमितियावत् आंगिरसोक्तप्रका
रेणप्रक्षालितपाणिःशुद्धवस्त्रंसंधार्यमंत्रस्नानंकृत्वानिरतिशयानंदवा २
प्तयेपरमहंसाश्रमाधिकारसिध्यर्थमातुरविधिनासन्यासमहंकरिष्ये
इतिसंकल्प्य ब्राह्मणानुज्ञयाशिखायांपंचसप्त केशान्स्थापयित्वाशिष्टा

न्केशास्मश्रुनखादीन्वापयेत् ततःसंध्यातर्पणादिकंकृत्वोपासनंकृत्वासंमा
सिंचंत्वुपस्थानंकुर्यात् संमासिंचंतुमरुतःसमिंद्रःसंबृहस्पतिः संमायमग्निः
सिंचत्वायुषाचबलेनचायुष्मंतंकरोतमामित्युपस्थायपात्रदाहंकृत्वाततःस
मारोपः आदौसम्यग्घस्तंप्रताप्यायंतेयोनिर्ऋत्वियोगिरः यातेअग्नेयज्ञि
यातनूस्तयेह्यारोहात्मात्मानुमच्छावसूनिकृण्वन्नस्मेनर्यापुरूणि य
ज्ञोभूत्वायज्ञमासीदस्वांयोनिंजातवेदोभुवआजायमानःसक्षयएहि
इतिमंत्रद्वयंत्रिःपठित्वाअंत्येआत्मनोमुखमध्येउष्मायथागच्छतियथा
कंआहवनीयाग्निसमारोपयेत् अग्निज्वालांप्राश्नीयादितिब्रह्मानंदीय
हस्तौप्रक्षाल्याचम्य ॐएह्यग्नेसहेषापूर्तैःशरीरमनुसंचरस्व नाहंत्वा
मपहायपरागाइतिमंत्रेणोपासनाग्निंविसृज्य आहिताग्निश्चेत्प्राजाप

आ·स·प· त्येष्टिस्थानेपूर्णाहुतिंकृत्वाश्रौताग्निंसमारोप्यसन्यसेत् विधुरब्रह्मचारिस्नात
२ कानामग्नेरभावादारोपोनास्ति संभवेतुकर्त्तव्यमेव ततोपांसमीगत्वापञ्चकृत्य पं
पात्रेकृत्वातोयमादायाप्सुजुहोति एषहवा अग्नेर्योनिर्यःप्राणःप्राणंगच्छः
2 स्वाहेतिप्रथमाहुतिः आपोवैसर्वादेवताःसर्वाभ्योदेवताभ्योजुहोमिस्वा
हेतिद्वितीयाहुतिः ततःपात्रस्थंहुतशेषंतोयमाशुःशिशानइत्यनुवाके
नाभिनाद्यपुत्रेषणावित्तेषणालोकेषणामयात्यक्तास्वाहेतितदुदकंहस्ते
नादायपिबेत् अभयंसर्वभूतेभ्योमत्तःस्वाहेतिद्वितीयंपिबेत् सन्यस्तं
मयास्वाहेतिनिःशेषंपात्रस्थमुदकंहस्तेनादायपिबेत् ततोगायत्रींव्या २
हृतोप्रवेशव्याहृतिंप्रणवेप्रविशेत् ब्रह्मांजलिंकृत्वापठेत् यत्किंचिद्बंध
नंकर्मकृतमज्ञानतोमया प्रमादालस्यदोषाद्यंतत्सर्वंसंत्यजाम्यहं ततो

नाभिमात्रजले प्रविश्य प्राङ्मुखः सन् गायत्रीं प्रविशामि इति संकल्प्य ॐ भूः सा
वित्रीं प्रविशामि तत्सवितुर्वरेण्यं ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धी
महि ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् समस्तव्याहृतिपूर्वां सर्वां
गायत्रीं जपेत् ॐ परोरजसे सावदों ॐ समस्तव्याहृतीः प्रणवे प्रविशामि भूर्भुवः
स्वः इति जपित्वाचम्य प्रणवमयात्मानं ध्यात्वा ततो न्यस्तवित्रं जलमंजलिपूर्ण
मादाय प्राच्यां दिशि दक्षिणस्यां प्रतीच्यां उदीच्यां मध्यायां च दिशि तूष्णीं च प्र
त्येकं निनयेत् ततः सूर्याभिमुख ऊर्ध्वबाहुः प्रैषमुच्चारयेत् ॐ भूः सन्यस्तं
मया ॐ भुवः सन्यस्तं मया ॐ सुवः सन्यस्तं मयेति उपांशुमध्यमो च्चैः स्वरेण
त्रिर्ब्रूयात् ततोऽभयं सर्वभूतेभ्यो मत्तः स्वाहेति प्राच्यां दिक्ष्युदकांजलिं निन
येत् ततः तूष्णीं शिखां निकृत्य विसृज्य यज्ञोपवीतं च छित्वा उभयमुदकांजलि

आ·स·प· नासहगृहीत्वा ॐभूःस्वाहेत्यप्सुजुहुयात् ततऊर्ध्वंपुत्रंगृहंनगच्छेत् अत्यं
३ तमातुरश्चेत्प्रैषमात्रंवदेत् जीवतिचेत्स्वस्थःसन्महावाक्योपदेशार्थंसद्गुरु
मुपसाद्यमहावाक्योपदेशंलब्ध्वाक्रमसन्यासविध्युक्ताचारेणवर्त्तयेत् उ
3 पदेशंविनातदानीमेवमरणेयतिसंस्कारविधिनैवसंस्कारनारायणबलि
पार्वणाराधनादिकुर्यात् इत्यातुरसन्यासप्रकारः अत्रमूलवचनानि आ
तुराणांविशेषोस्तिनविधिर्नैवचक्रिया प्रैषमात्रस्तुसन्यासआतुराणांवि
धीयते गत्वोदकसमीपंतुपात्रयोरप्युद्धरेत् तयोरेकंकरेणाथगृहीत्वा
दक्षिणानवे अप्स्ववलेषइत्यादिमंत्राभ्यांजुहुयात्सुधीः कृत्वाहुतिद्व ३
यंपश्चात्पात्रस्थाहुतिशेषकं आशुःशिशानोवृषभोनुवाकेनाभिमंत्र
येत् पुत्रेषणेतिमंत्रेणतद्गृहीत्वापिबेज्जलं द्वितीयमभयंसर्वेत्येवमुक्त्वा

आ॰स॰प॰ पिबेद्द्विजः ॐ भूर्भुवः स्वरिति पिबेच्छेषं न शोषयेत् आदायांजलिना तोयमन्य
४ त्रातिदिशं क्षिपेत् आदित्याभिमुखो भूत्वा चोर्ध्वबाहुरतंद्रियः संन्यस्तोहमितिमं
त्रात्रिवारमभ्यसेद्बुधः ~~ततःपरंगृहं~~बंधून्नगच्छेद्भिक्षुको भवेत् मृते तु निक्षि
५ पेद्भूमावुदकेवायथाविधि सोमयाजी भवेत्प्राजापत्यो वैश्वानरी तथा त्रेधा
रवीयामिष्ट्वावासर्वदेवसदक्षिणां यद्यरोक्तो भवेदाहवनीये जुहुयाद्बुधः
देवतायै प्रधानायै पूर्णाहुतिमनुत्तमं असौ स्वर्गाय लोकाय स्वाहेति ज्वल
योत्तमः पात्राणि मृन्मयानां तु प्रक्षेपोऽप्सु विधीयते अयं ते योनिर्यातेहुत्वा
भ्यात्मन्यग्नीन्समारोपयेत् ततः आतुरसंन्यासं कुर्यात्पूर्वविधानतः ५
उक्त आतुरसंन्यास आलोच्यांगिरसो मतः इत्यांगिरसीये आतुरसंन्या
सप्रकारः श्रीनारेश्वरार्पणमस्तु श्रीगुरुभ्यो नमः श्रीपरमगुरुभ्यो नमः